इति यजु० २५,१३ स्पर्शार्थे प्रयोगात्। "अनड्वाहमन्वारभामहे आलभामहे स्पृशाम" इति वेददीपः। [रूढ़े च।

**अन्वारूढ** त्रि० अनु+आ+रुह–क्त। अधिरूढ़े। पश्चादा-

**अन्वारोहण** न० पश्चात् आरोहणम्। पश्चाद्भर्त्तरि मृते पश्चात् सह वा स्त्रियाश्चितारोहणे तच्च "ब्रह्मचर्यं तदन्वारोहणं वेति" वि०सूत्रे विहितम् विवृतमनुमरणशब्दे।

**अन्वासन** न० अनु+आस–ल्युट्। अनूपवेशनेन सेवने।

**अन्वासित** त्रि० अनु+आस–कर्मणि क्त। पश्चादुपवेशनादिना सेविते "अन्वासितमरुन्धत्येति" रघुः।

**अन्वाहार्य्य** न० मासि मासि आह्रियते अनु+आ+हृ–कर्मणि ण्यत्। "यच्छ्राद्धं कर्म्मणामादौ या चान्ते दक्षिणा भवेत्। आमावास्यं द्वितीयं स्यादन्वाहार्य्यं विदुर्बुधा इति" कात्यायनपरिभाषिते नान्दीमुखश्राद्धे, अमावास्यायां मासि मासि कर्त्तव्ये श्राद्धे, दक्षिणायाञ्च "पितॄणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधा इति मनुः। "सर्वाण्येवान्वाहार्य्यवन्ति" गोभि०। अन्वाहार्य्यं नान्दीमुखश्राद्धम् दक्षिणा च तदुभयवन्ति। स्वार्थे कन् तत्रैव। "पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकमिति" मनुः मासिमासिकर्त्तव्यश्राद्धस्यानुमासमाह्रियमाणत्वात् नान्दीमुखस्य संस्कारादौ आह्रियमाणत्वात्, दक्षिणायाः कर्म्मणां पश्चात् आह्रियमाणत्वाच्च तथात्वम्।

**अन्वाहार्य्यपचन** पु० अन्वाहार्य्यं तदर्थाचं पच्यतेऽनेन पच+ल्युट्। दक्षिणाग्नौ ऋग्वेदविधिना स्थापितेऽग्नौ। "अथ हैनमन्वाहार्य्यपचनोऽनुशशासापो दिशो नक्षत्राणि चन्द्रमा इति छा०उप०। अन्वाहार्य्यपचनो दक्षिणाग्निरापो दिशो नक्षत्राणि चन्द्रमा इत्येतमेमम चतस्रस्तनवस्ततुर्द्धा अहमन्वाहार्य्यपचनः विभज्य आत्मानं स्थितः इति" भा०। "प्रसिद्धं हि दर्शपौर्णमासयोरन्वाहार्य्यपचने हविः श्रपयन्तीति" आन०गि०। "यस्मिन्नग्नावृचा वा साम्ना वा यजुषा वा समिधं वाभ्यादध्यादाहुतिं वा जुहुयादन्ते दक्षिणां वा हरेयुरनु वा गमयेयुर्दक्षिणा वाहैरन हरन्त्यान्वाहार्य्यपचनोभविष्यतीति अनु वा गमयन्ति" इति शत० ब्रा० तस्य निरुक्तिर्दर्शिता।

**अन्वाहित** त्रि० अनु+आ+धा–क्त। कृतान्वाधाने, वह्नौ-प्रक्षिप्तसमिद्विशेषे अन्वारोपिते" आधेःस्वामिनोदानार्थमपरस्य हस्ते निक्षिप्ते च। "अन्वाहितं याचितकमित्यादि या०।

**अन्विच्छा** स्त्री अनु+इष–अ नि०। अन्वेषणे।

**अन्वित** त्रि० अनु+इण+क्त। अनुगते, युक्ते, सहसम्बद्धे, शाब्दबोधे विशेष्यताप्राप्ते च "प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति" न्यायः।

**अन्विष्ट** त्रि० अनु+इष्–क्त। अन्वेषिते कृतान्वेषणे। "यद्वायुरन्विष्टमृगैः किरातै"रिति कुमा०। कृतानुसन्धाने च "अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्ज्जित" इति शा०भा०।

**अन्विति** स्त्रि० इण–क्तिन् नमस्कारेण अनुकूला इतिः यस्य। नत्या अनुकूलताप्राप्ते "अन्वितिरसि दिवे त्वेति" ता० ब्रा०। "अन्वितिः अनुकूलनतियुक्तोऽसीति" भा०।

**अन्वीक्षा** स्त्री पश्चात् ईक्षा पर्य्यालोचना प्रा०स०। वेदवाक्यश्रवणस्य पश्चात् तदर्थनिश्चयार्थं तदर्थपर्य्यालोचने, अन्वीक्षायै हिता ठक्। आन्वीक्षिकी तर्कविद्या। "आन्वीक्षिकी कौशलानामिति" गीता। ल्युट्। अन्वीक्षणमप्यत्र न०।

**अन्वीत** त्रि० अनु+ई–गतौ कर्त्तरि क्त। अनुगते अन्वितशब्दार्थे

**अन्वीप** त्रि० अनुगता आपो यत्र स्थानादौ अच्समा० अचि अत ईत्। अनुगतजले स्थाने, देशे वाच्ये तु "ऊदनोर्देशे" इति पा० ऊत्, अनूपोदेशः।

**अन्वृच** अव्य० ऋचि विभ० अव्ययी० अच् समा०। ऋचीत्यर्थे। "त्रिष्टुभश्चान्वाह ताभ्यायुक्तो बभ्रुरुक्तं वेवान्मन्वृचमिति" शत०ब्रा०।

**अन्वेष** पु० अनु+इष–भावे घञ्। अन्वेषणे अनुसन्धाने गवेषणे "वयं तत्त्वान्वेषान्मधुकर! हतास्त्वं खलु कृतीति" शकु०।

**अन्वेषण** न० अनु+इष–भावे ल्युट्। अनुसन्धाने गवेषणे नष्टद्रव्यस्य दर्शनाय लाभाय वा व्यापारभेदे। "रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ" रघुः।

**अन्वेषणा** स्त्री अनुगता एषणा "इषेरनिच्छार्थकस्येति" पा० युच् टाप्। तत्त्वानुसन्धाने तर्कादिना ज्ञातपदार्थस्य शुद्ध्यर्थं युक्त्यादिना समर्थने गवेषणे च।

**अन्वेषित** त्रि० अनु+एष–गतौ–इष–स्वार्थे णिच्–कर्म्मणि वा क्त। गवेषिते, कृतानुसन्धाने च।

**अन्वेषिन्** अनु+इष–णिनि। गवेषणकर्त्तरि "तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यतामिति" रघुः। स्त्रियां ङीप्।

**अन्वेष्टव्य** त्रि० अनु+इष–कर्म्मणि तव्य। अनुसन्धेये "सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति श्रुतिः "अन्वेष्टव्यात्मविज्ञानात् प्राक्प्रमातृत्वमात्मन" इति शा०भा०।

**अन्वेष्टृ** त्रि० अनु+इष–शीलार्थे तृच् वा इड़भावः। गवेषण